Geeta Jayanti 2019a

"आ नो भद्रा: क्रतवो यन्तु विश्वत:"

Let noble thoughts reach us from all over the universe

The relevance in modern life of

Shreemad Bhagavad Geeta

Bhagavad Geeta is a dialogue between Bhagavan Krushna and Arjun on the battle field of Mahabharata.

The battle dates back to 3600 BC

BG appears in Mahabharata Bhishma Parva chapters 23 to 40. It has 700 Shlok in 18 Chapters

First opening shlok is by Dhrutarashtra,

Sanjay - 41, Arjun - 84 and Bhagavan Krushna 574

Chapter	Krushna	Arjun	Sanjay	Total
1 Arjun Vishad Yog	0	21	26	47
2 Sankhya Yog	63	6	3	72
3 Karma Yog	40	3	0	43
4 Jnana Karma Sanyas Yog	41	1	0	42
5 Karma Sanyas Yog	28	1	0	29
6 Dhyan Yog	42	5	0	47
7 Jnana Vignana Yog	30	0	0	30
8 Akshar Brahma Yog	26	2	0	28
9 Raj Vidya Raj Guhya Yog	34	0	0	34
10 Vibhooti Yog	35	7	0	42
11 Vishwa Roop Darshan Yog	14	33	8	55
12 Bhakti Yog	19	1	0	20
13 Kshetra Kshetrajna Vibhag Yog	34	0	0	34
14 Guna Traya Vibhas Yog	26	1	0	27
15 Purushottam Yog	20	0	0	20
16 Daivasur Sampat Vibhag Yog	24	0	0	24
17 Shraddha Tray Vibhag Yog	27	1	0	28
18 Moksha Sanyas Yog	71	2	5	78
Total	**574**	**84**	**42**	**700**

How BG transforms our lives

C : Caring People with necessary Communication for Change to happen ;

H : Humourise & Humanize the Environment ;


A : Awareness & Awareness Programs inculcated systematically ;

N : Nurture People & Environment with needed skills for Change Process ;

G : Getting into Creativity & Innovations in the entire sphere of life ;


E : Explore EQ (Emotional Intelligence) of People & Empower for Change Process...

System of education should aim at character building, achieving strength of mind, expansion of intellect and then only one can stand on one's own feet. Those people can bring a lasting and transformative effect and will be assets for their family, society and nation.



.

Emotional intelligence (otherwise known as emotional quotient or **EQ**) is the ability to understand, use, and manage your own emotions in positive ways to relieve stress, communicate effectively, empathize with others, overcome challenges and defuse conflicts.



"When I read the *Bhagavad-Gita* and reflect about how God created this universe everything else seems so superfluous. All are interrelated! ***Bhagavad Gita of Hinduism explains every single fundamental of science whereas the opposite does not hold good!*** Spirituality... dictates of *Bhagavad Gita* is beyond purview of science! Spirituality starts from the point where science ends. Science was meant for the human self... the physical manifest form! To earn our livelihood... to live life in a meaningful manner... developments of science were necessitated!"

76th Annual Meeting, of the Academy of Management, attended by more than 10,000 business and management researchers and professionals from around the world, was held in August 2016 at the Anaheim Convention Center of Stillman School of Business, Seton Hall University.

The symposium, entitled

"Looking into the Bhagavad Gita for Managing Organizations to Become Meaningful,"

The Bhagavad Gita considers humans as multi-potential spiritual entities that work to seek meaning and a place in the larger plan of existence. There is some learning in The Bhagavad Gita for everyone connected with management. For example, it guides how to achieve the goal of creating a purpose and meaning for what employees do at work. The meaningfulness of the work they do has been a factor in employees' decision in picking the best companies to work for in America. ***They trade off higher salaries for a better organizational culture that meets this condition.*** *That is what makes management's understanding of how to make work meaningful so important. Successful managers run their organizations so that their employees actually fulfill their desire to attain their purpose and meaning through the work they do, and the Bhagavad Gita is focused on that (citations omitted).*

Presented to a crowded house, interest in the symposium was so great that its time slot had to be extended by more than a half hour to accommodate responses to audience questions and comments.

तस्य सञ्जनयन्हर्षं कुरुवृद्धः पितामहः |
सिंहनादं विनद्योच्चैः शङ्खं दध्मौ प्रतापवान् ||१- १२||

ततः शङ्खाश्च भेर्यश्च पणवानकगोमुखाः |
सहसैवाभ्यहन्यन्त स शब्दस्तुमुलोऽभवत् ||१- १३||

ततः श्वेतैर्हयैर्युक्ते महति स्यन्दने स्थितौ |
माधवः पाण्डवश्चैव दिव्यौ शङ्खौ प्रदध्मतुः ||१- १४||

पाञ्चजन्यं हृषीकेशो देवदत्तं धनञ्जयः |
पौण्ड्रं दध्मौ महाशङ्खं भीमकर्मा वृकोदरः ||१- १५||



अनन्तविजयं राजा कुन्तीपुत्रो युधिष्ठिरः |
नकुलः सहदेवश्च सुघोषमणिपुष्पकौ ||१- १६||

काश्यश्च परमेष्वासः शिखण्डी च महारथः |
धृष्टद्युम्नो विराटश्च सात्यकिश्चापराजितः ||१- १७||

द्रुपदो द्रौपदेयाश्च सर्वशः पृथिवीपते |
सौभद्रश्च महाबाहुः शङ्खान्दध्मुः पृथक्पृथक् ||१- १८||

स घोषो धार्तराष्ट्राणां हृदयानि व्यदारयत् |
नभश्च पृथिवीं चैव तुमुलोऽभ्यनुनादयन् ||१- १९||

अर्जुन उवाच ।
दृष्ट्वेमं स्वजनं कृष्ण युयुत्सुं समुपस्थितम् ॥१- २८॥

सीदन्ति मम गात्राणि मुखं च परिशुष्यति ।
वेपथुश्च शरीरे मे रोमहर्षश्च जायते ॥१- २९॥

गाण्डीवं स्रंसते हस्तात्त्वक्चैव परिदह्यते ।
न च शक्नोम्यवस्थातुं भ्रमतीव च मे मनः ॥१- ३०॥



When I see my own people arrayed and eager to fight O Krushna,
My limbs quail, my mouth goes dry, my body shakes and my hair stands on end.
Gandiva slips from my hand and my skin too is burning all over. I am not able to stand steady. My mind is reeling.



अर्जुन उवाच ।
सेनयोरुभयोर्मध्ये रथं स्थापय मेऽच्युत ||१- २१||

यावदेतान्निरीक्षेऽहं योद्धुकामानवस्थितान् ।
कैर्मया सह योद्धव्यमस्मिन् रणसमुद्यमे ||१- २२||

निमित्तानि च पश्यामि विपरीतानि केशव |
न च श्रेयोऽनुपश्यामि हत्वा स्वजनमाहवे ||१- ३१||
न काङ्क्षे विजयं कृष्ण न च राज्यं सुखानि च |
किं नो राज्येन गोविन्द किं भोगैर्जीवितेन वा ||१- ३२||
येषामर्थे काङ्क्षितं नो राज्यं भोगाः सुखानि च |
त इमेऽवस्थिता युद्धे प्राणांस्त्यक्त्वा धनानि च ||१- ३३||
आचार्याः पितरः पुत्रास्तथैव च पितामहाः |
मातुलाः श्वशुराः पौत्राः श्यालाः सम्बन्धिनस्तथा ||१- ३४||
एतान्न हन्तुमिच्छामि घ्नतोऽपि मधुसूदन |
अपि त्रैलोक्यराज्यस्य हेतोः किं नु महीकृते ||१- ३५||
निहत्य धार्तराष्ट्रान्नः का प्रीतिः स्याज्जनार्दन |
पापमेवाश्रयेदस्मान्हत्वैतानाततायिनः ||१- ३६||
तस्मान्नार्हा वयं हन्तुं धार्तराष्ट्रान्स्वबान्धवान् |
स्वजनं हि कथं हत्वा सुखिनः स्याम माधव ||१- ३७||
यद्यप्येते न पश्यन्ति लोभोपहतचेतसः |
कुलक्षयकृतं दोषं मित्रद्रोहे च पातकम् ||१- ३८||
कथं न ज्ञेयमस्माभिः पापादस्मान्निवर्तितुम् |
कुलक्षयकृतं दोषं प्रपश्यद्भिर्जनार्दन ||१- ३९||
कुलक्षये प्रणश्यन्ति कुलधर्माः सनातनाः |
धर्मे नष्टे कुलं कृत्स्नमधर्मोऽभिभवत्युत ||१- ४०||
अधर्माभिभवात्कृष्ण प्रदुष्यन्ति कुलस्त्रियः |
स्त्रीषु दुष्टासु वार्ष्णेय जायते वर्णसङ्करः ||१- ४१||
सङ्करो नरकायैव कुलघ्नानां कुलस्य च |
पतन्ति पितरो ह्येषां लुप्तपिण्डोदकक्रियाः ||१- ४२||
दोषैरेतैः कुलघ्नानां वर्णसङ्करकारकैः |
उत्साद्यन्ते जातिधर्माः कुलधर्माश्च शाश्वताः ||१- ४३||
उत्सन्नकुलधर्माणां मनुष्याणां जनार्दन |
नरके नियतं वासो भवतीत्यनुशुश्रुम ||१- ४४||
अहो बत महत्पापं कर्तुं व्यवसिता वयम् |
यद्राज्यसुखलोभेन हन्तुं स्वजनमुद्यताः ||१- ४५||
यदि मामप्रतीकारमशस्त्रं शस्त्रपाणयः |
धार्तराष्ट्रा रणे हन्युस्तन्मे क्षेमतरं भवेत् ||१- ४६||

श्रीभगवानुवाच ।

कुतस्त्वा कश्मलमिदं विषमे समुपस्थितम् ।
अनार्यजुष्टमस्वर्ग्यमकीर्तिकरमर्जुन ।।२- २।।
क्लैब्यं मा स्म गमः पार्थ नैतत्त्वय्युपपद्यते ।
क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परन्तप ।।२- ३।।

The Blessed Lord said O Arjuna, in this perilous place, whence has come to you this impurity entertained by unenlightened persons, which does not lead to heaven and which brings infamy?

O Partha, yield not to unmanliness. This does not befit you. O scorcher of foes, arise, giving up the petty weakness of the heart.

कार्पण्यदोषोपहतस्वभावः
पृच्छामि त्वां धर्मसम्मूढचेताः |
यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे
शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम् ||२- ७||

My very being is stricken with the weakness of (sentimental) pity. With my mind bewildered about my duty, I ask Thee. Tell me, for certain, which is better. I am thy pupil; teach me, who am seeking refuge in Thee.



श्रीभगवानुवाच |
अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे |
गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः ||२- ११||
न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः |
न चैव न भविष्यामः सर्वे वयमतः परम् ||२- १२||
देहिनोऽस्मिन्यथा देहे कौमारं यौवनं जरा |
तथा देहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति ||२- १३||
मात्रास्पर्शास्तु कौन्तेय शीतोष्णसुखदुःखदाः |
आगमापायिनोऽनित्यास्तांस्तितिक्षस्व भारत ||२- १४||
यं हि न व्यथयन्त्येते पुरुषं पुरुषर्षभ |
समदुःखसुखं धीरं सोऽमृतत्वाय कल्पते ||२- १५||
नासतो विद्यते भावो नाभावो विद्यते सतः |
उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः ||२- १६||
अविनाशि तु तद्विद्धि येन सर्वमिदं ततम् |
विनाशमव्ययस्यास्य न कश्चित्कर्तुमर्हति ||२- १७||
अन्तवन्त इमे देहा नित्यस्योक्ताः शरीरिणः |
अनाशिनोऽप्रमेयस्य तस्माद्युध्यस्व भारत ||२- १८||
य एनं वेत्ति हन्तारं यश्चैनं मन्यते हतम् |
उभौ तौ न विजानीतो नायं हन्ति न हन्यते ||२- १९||
न जायते म्रियते वा कदाचिन्
नायं भूत्वा भविता वा न भूयः |
अजो नित्यः शाश्वतोऽयं पुराणो
न हन्यते हन्यमाने शरीरे ||२- २०||
वेदाविनाशिनं नित्यं य एनमजमव्ययम् |
कथं स पुरुषः पार्थ कं घातयति हन्ति कम् ||२- २१||
वासांसि जीर्णानि यथा विहाय
नवानि गृह्णाति नरोऽपराणि |
तथा शरीराणि विहाय जीर्णा-
न्यन्यानि संयाति नवानि देही ||२- २२||
नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः |
न चैनं क्लेदयन्त्यापो न शोषयति मारुतः ||२- २३||

अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च |
नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः ||२- २४||
अव्यक्तोऽयमचिन्त्योऽयमविकार्योऽयमुच्यते |
तस्मादेवं विदित्वैनं नानुशोचितुमर्हसि ||२- २५||
अथ चैनं नित्यजातं नित्यं वा मन्यसे मृतम् |
तथापि त्वं महाबाहो नैवं शोचितुमर्हसि ||२- २६||
जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च |
तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि ||२- २७||
अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत |
अव्यक्तनिधनान्येव तत्र का परिदेवना ||२- २८||
आश्चर्यवत्पश्यति कश्चिदेन-
माश्चर्यवद्वदति तथैव चान्यः |
आश्चर्यवच्चैनमन्यः श‍ृणोति
श्रुत्वाप्येनं वेद न चैव कश्चित् ||२- २९||

देही नित्यमवध्योऽयं देहे सर्वस्य भारत |
तस्मात्सर्वाणि भूतानि न त्वं शोचितुमर्हसि ||२- ३०||
स्वधर्ममपि चावेक्ष्य न विकम्पितुमर्हसि |
धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत्क्षत्रियस्य न विद्यते ||२- ३१||
यदृच्छया चोपपन्नं स्वर्गद्वारमपावृतम् |
सुखिनः क्षत्रियाः पार्थ लभन्ते युद्धमीदृशम् ||२- ३२||
अथ चेत्त्वमिमं धर्म्यं संग्रामं न करिष्यसि |
ततः स्वधर्मं कीर्तिं च हित्वा पापमवाप्स्यसि ||२- ३३||
अकीर्तिं चापि भूतानि कथयिष्यन्ति तेऽव्ययाम् |
सम्भावितस्य चाकीर्तिर्मरणादतिरिच्यते ||२- ३४||
भयाद्रणादुपरतं मंस्यन्ते त्वां महारथाः |
येषां च त्वं बहुमतो भूत्वा यास्यसि लाघवम् ||२- ३५||
अवाच्यवादांश्च बहून्वदिष्यन्ति तवाहिताः |
निन्दन्तस्तव सामर्थ्यं ततो दुःखतरं नु किम् ||२- ३६||

हतो वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीम् ।
तस्मादुत्तिष्ठ कौन्तेय युद्धाय कृतनिश्चयः ॥२- ३७॥

Abraham Maslow
peak experience

